॥ श्रीगणेशाय नमः ॥

अथ शिलान्यासविधिः

अथ कर्ता शुद्धासने उपविश्य दीपं प्रज्वाल्याऽऽचम्य सङ्कल्पं कुर्यात् (कर्मपात्र बनाई सङ्कल्प गर्ने)

ॐ अद्येत्यादि देशकालौ सङ्कीर्त्य अमुकगोत्र ... अहं अद्यकर्तव्य शिलान्यासकर्मणि दीपकलशगणेश-पूजनपूर्वकमेतद्गृहावासस्य स्थैर्य सिद्धये आयुरारोग्यपुत्रपौत्रद्विपदचतुष्पदधनधान्यादिसमृद्धये शिव प्राप्त्ये च नन्दादि पञ्चदेवताः पूजनं स्थापनं च करिष्ये। इति सङ्कल्प्य ब्राह्मणवरणं पुण्याहवाचनं च विधाय दीपं कलशं गणेशं च यथाविधि पूजयेत्। (दियो कलश, गणेशको पूजा गरी रक्षाबन्धनको पूजा गर्ने)

ततो रक्षोहणमिति मन्त्रेण रक्षासूत्रमभिमन्त्य सम्पूज्य दिक्साधनं विधाय ईशानतः प्रादक्षिण्येन रक्षासूत्रेण संवेष्ट्य सुवर्णेन रेखां कृत्वा पञ्चशिलाः पञ्चइष्टका वा पञ्चताम्रकलशान् पञ्चदीपांश्च संस्थाप्य तत्र गृहमित चतुष्कोणेषु लोहकीलकं निदध्यात् अनेन मन्त्रेण – (पाँचओटा इँटा र कलश थाली ठिक पार्ने)

ॐ विशन्तु भूतले नागा लोकपालाश्च सर्वशः। अस्मिन् गृहेऽवतिष्ठन्तु आयुर्बलकराः सदा ॥

तत्रैव दध्यक्षतबलिं च दद्यात् (दही र अक्षताको बलि दिने)

ॐ अग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः। बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ स्वाहा ॥

तत उत्खातभूमौ सर्षपान् विकिरेत् (सर्स्यूँ छर्कने)

ॐ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा। स्थानं त्यक्त्वा तु तत्सर्वं यत्रत्यं तत्र गच्छतु ॥

ॐ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥

भूतप्रेतपिशाचाद्या अपक्रामन्तु रक्षसाः। स्थानादस्माद् व्रजन्त्वन्यत् स्वीकरोमि भुवं त्विमाम् ॥

इति भूतोत्सादनं कृत्वा, अर्घ्यं संस्थाप्य, तत आपो हिष्ठेति मन्त्रेण पञ्चगव्येन सर्वां भुवं प्रोक्षेत्– (अर्घ्य स्थापना गरी पञ्चगव्य छर्कने)

ॐ आपो हिष्ठा मयोभुवस्ता नऽऊर्जे दधातन। महे रणाय चक्षसे। ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥ ॐ तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ। आपो जन यथा च नः ॥

तत उत्तरवृद्ध्या उपशिलासहिता (नन्दादि पाँच शिलाको पूजा गर्ने)

नन्दा भद्रा जया रिक्ता पूर्णा संज्ञकाः पञ्चशिलाः पञ्चगव्येन स्नापयित्वा कुशशय्यायां भद्रासने स्थापयित्वा कुङ्कुमचन्दनं लिप्त्वा, नन्दादिशिलासु क्रमेण ब्रह्मविष्णुरुद्रेशानसदाशिवानावाह्य (ॐ मनो जूतिरिति) प्रतिष्ठाप्य वस्त्रेणाच्छाद्य (सतिसम्भवे सप्तमृतिका, पञ्चकषाय, गोमूत्र, गोमय, समस्तपञ्चगव्य, व्यस्तपञ्चगव्य, व्यस्तपञ्चामृत, फल, रत्न, सुवर्ण, वृषशृङ्ग, तीर्थोदक, गन्धोदकयुतैः कलशोदकैः समन्त्रपाठं) नन्दाद्याः शिलाः

स्नापयेत्। ततो वस्त्रेण परिमार्ज्य सरलासने निवेश्य केसरादियुतेन सुगन्धिना चन्दनेनानुलिप्य सुवर्णादिशलाकया कुङ्कुमादिना नन्दाशिलायां पद्मं, भद्राशिलायां सिंहासनं, जयाशिलायां तोरणं छत्रं च, रिक्ताशिलायां कूर्मं, पूर्णाशिलायां चतुर्भुजं, विष्णुं च टङ्कोत्किरणमनुसृत्य लिखित्वा वस्त्रेणाच्छाद्याभिषिच्य नन्दाशिलायां ॐ भूर्भुवःस्वः ब्रह्मणे नमः । पूजार्थं त्वामावाहयामि स्थापयामि इत्यावाह्य ॐ ब्रह्मजज्ञानम्... । इति मन्त्रेण पाद्यादिभिरुपचारैः पूजयेत् । एवं क्रमेण भद्राशिलायां विष्णुमावाह्य ॐ इदं विष्णुः ... इति विष्णुं, जयाशिलायां रुद्रमावाह्य ॐ नमस्ते रुद्र... इति रुद्रम्, रिक्ताशिलायां ईश्वरमावाह्य ॐ तमीशानम् ... इति ईश्वरम्, पूर्णाशिलायां सदाशिवमावाह्य ॐ नमः शम्भवाय इति सदाशिवं पूजयेत् । (पूर्वदेखि पूजा गर्ने)

ततः पूर्वादिक्रमेण इन्द्रादिदशदिक्पालानावाह्य ॐ त्रातारमिन्द्रम्... इत्यादि दिक्पालमन्त्रैः सम्पूज्य बलिं च दद्यात् ।

बलिदानमन्त्रस्तु

(दहीअक्षता राखेर बत्ती बाल्ने)

ॐ इन्द्राय साङ्गाय सायुधाय सपरिवाराय सशक्तिकाय नमः, इमं सदीपबलिं समर्पयामि भो भो इन्द्र दिशं रक्ष रक्ष बलिं भक्ष भक्ष यजमानस्यायुष्कर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता वरदो भव । एवं क्रमेण अग्न्यादिदिक्पालेभ्यश्च बलिं दद्यात् ।

तत उत्तरे क्षेत्रपालमावाह्य

(क्षेत्रपालको पूजा गर्ने)

ॐ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि । मा त्वा हिꣳसीन्मा माहिꣳसीः ।

इति मन्त्रेण सम्पूज्य बलिं दद्यात् । ततो नैर्ऋत्ये भूतादीन् सम्पूज्य बलिं दद्यात् ।

ततो बास्तुभूमिं सम्पूज्य प्रार्थयेत्

(भूमिमा वास्तुको पूजा गर्ने)

ॐ विश्वं त्वं कमले भूते पृथिवि लोकधारिणि । यज्ञार्थे क्षोभिता देवि प्रसीद परमेश्वरि ॥

ततो वास्तुपुरुषम्

(वास्तुपुरुषको पूजा गर्ने)

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवो भवा नः ।
यत्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे ॥

इति मन्त्रेण सम्पूज्य प्रार्थयेत्

(नमस्कार गर्ने)

ॐ वास्तोष्पते नमस्तेऽस्तु भूमिशय्यारत प्रभो । मद्गृहं धनधान्यादिसमृद्धं कुरु सर्वदा ॥ (प्रत्येकलाई पूजा गर्ने)

ततः ॐ नन्दे इहागच्छ इह तिष्ठ । ॐ नन्दायै नमः । इति नन्दाशिलां सम्पूज्य एवमेव क्रमेण भद्राशिलां, जयाशिलां, रिक्ताशिलां, पूर्णाशिलामपि नाममन्त्रेण पूजयेत् । ततो नन्दादिशिलानामग्रे कलशस्थापनविधिना उत्तरोतरक्रमेण पञ्चकलशान् स्थापयित्वा तेषु सर्वेषु – आज्य, मधु, पारद, शैवालपञ्चरत्नानि प्रक्षिप्य – ॐ पद्माय नमः ॐ महापद्माय नमः । ॐ शङ्खाय नमः । ॐ विजयाय नमः । (ॐ मकराय नमः ।) ॐ सर्वतोभद्राय नमः । इति नाममन्त्रेणावाह्यय प्रतिष्ठापूर्वकं सम्पूज्य धूपदीपनैवेद्यादींश्च कृत्वा स्थाल्या कलशमुखं पिदध्यात् ।

(धूपबत्ती गरी नैवेद्य चढाउने)

अथ शिलान्यासः

(शिलाको पूजा गर्ने)

तत्र ईशानादिक्रमेण पद्मादिकलशान् संस्थाप्य तेषामुपरि नन्दाद्या शिलाः न्यसेत् । तत्रक्रमः– प्रथमम् ईशाने आधारशिलां न्यस्य तस्या मध्यगर्ते अक्षतोपरि मध्वाज्यपारदपञ्चरत्नगर्भितं पिहितमुखं पद्मकलशं निधाय आधारशिलां सदाशिवरूपिणीं तेजोमयीं ध्यात्वा – (नमस्कार गर्ने)

ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥ ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ꣳ समिमं दधातु । विश्वेदेवासऽइह मादयन्तामों ३ ॥ प्रतिष्ठ ॥ इति पठित्वा – (प्रतिष्ठा गर्ने)

ॐ भूर्भुवः स्वः आधारशिले सुप्रतिष्ठिता भव । इति प्रतिष्ठापयेत् । ततस्तां सम्पूज्य मृदा दृढीकृत्य तस्या वामे दीपं च विन्यसेत् । ततः पद्मकलशोपरि प्राक्शिरसं नन्दाशिलाम् – (बत्ती बाल्ने)

ॐ स्थिरो भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् । पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ॥ ॐ नाभिर्मे चित्तं विज्ञानं पायुर्मेपचितिर्भसत् । आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः ॥ जङ्घाभ्यां पद्भ्यां धर्मोस्मि विशि राजा प्रतिष्ठितः ॥ इति मन्त्राभ्यां संस्थाप्य गन्धादिभिः सम्पूज्य प्रार्थयेत् – (कलश राख्ने र नमस्कार गर्ने)

ॐ नन्दे त्वं नन्दिनीं पुंसां त्वामत्र स्थापयाम्यहम् । वेश्मनि त्विह सन्तिष्ठ यावच्चन्द्रार्कतारकाः ॥
आयुः कामं श्रियं देहि देववासिनि नन्दिनि । अस्मिन् रक्षा त्वया कार्या सदा वेश्मनि यत्नतः ॥

॥ इति नन्दाशिलास्थापनम् ॥

तत आग्नेयकोणे पूर्ववत् आधारशिलां विन्यस्य पिहितमुख महापद्मकलशं निधाय तदुपरि – (नमस्कार गर्ने)

ॐ भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः॥ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋतसदन्यसि। वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ इति मन्त्रद्वयं पठित्वा भद्राशिलां स्थापयित्वा सम्पूज्य प्रार्थयेत् – (नमस्कार गर्ने)

ॐ भद्रे त्वं सर्वदा भद्रं लोकानां कुरु काश्यपि । आयुर्दा कामदा देवि सुखदा च सदा भव ॥

॥ इति भद्राशिलास्थापनम् ॥

ततो नैर्ऋत्यकोणे पूर्ववत् आधारशिलां स्थापयित्वा पिहितमुखं शङ्खकलशं निधाय तदुपरि– (नमस्कार गर्ने)

**ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ ॐ वरुणस्योत्तम्भनमसि ।**

इति मन्त्रद्वयं पठित्वा जयाशिलां संस्थाप्य गन्धादिभिः सम्पूज्य प्रार्थयेत् – (नमस्कार गर्ने)

ॐ गर्गगोत्रसमुद्भूतां त्रिनेत्रां च चतुर्भुजाम् । गृहेऽस्मिन् स्थापयाम्यद्य जयां चारुविलोचनाम् ॥
नित्यं जयाय भूत्यै च स्वामिनो भव भार्गवि ॥ इति जयाशिलास्थापनम् ।

ततो वायव्यकोणे पूर्ववत् आधारशिलां विन्यस्य पिहितमुखं विजय (मकर) कलशं निधाय तदुपरि –
ॐ त्र्यम्बकं यजामहे । ॐ वरुणस्योतम्भनम् ... । इति मन्त्रद्वयं पठित्वा रिक्ताशिलां संस्थाप्य गन्धादिभिः सम्पूज्य प्रार्थयेत् –

(नमस्कार गर्ने)

ॐ रिक्ते त्वं रिक्तदोषघ्ने सिद्धिभुक्तिप्रदे शुभे । सर्वदा सर्वदोषघ्नि तिष्ठास्मिंस्तत्र नन्दिनि ॥

॥ इति रिक्ताशिलास्थापनम् ॥

ततो वास्तुभूमेर्मध्ये पूर्ववत् आधारशिलां विन्यस्य पिहितमुखं सर्वतोभद्रकलशं निधाय तदुपरि –

ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहाऽइषमूर्ज ँ शतक्रतो ॥

इति मन्त्रेण संस्थाप्य गन्धादिभिः सम्पूज्य प्रार्थयेत् –

(नमस्कार गर्ने)

ॐ पूर्णे त्वं सर्वदा पूर्णं लोकानां कुरु काश्यपि । आयुर्दा कामदा देवि धनदा सुतदा तथा ॥
गृहाधारा वास्तुमयी वास्तुदीपेन संयुता । त्वामृते नास्ति जगतामाधारश्च जगत्प्रिये ॥

॥ इति पूर्णाशिलास्थापनम् ॥

(पञ्चकलश, थाली, शिला राखी माथिबाट पूजा गर्ने)

ततः पञ्चशिलासु अष्टधातुंश्च निक्षिप्य – ॐ नन्दायै नमः । इत्यादि क्रमेण पुनः पूजयेत् । ततः सदीपं पायसबलिं दध्यक्षतबलिं वा दत्वा हस्तौ पादौ प्रक्षाल्याचम्य शान्तिकाध्यायं पठित्वा आर्चायाय गां दद्यात् –

(पायसको या दहि, अक्षताको बलि दिने र आचमन गरी गोदान गर्ने)

ॐ अद्येह ... गोत्र ... शर्माहं कृतैतत् ... शिलान्यासकर्मणः साङ्गतायै इमां गां (गोनिष्क्रयद्रव्यं वा) ... गोत्राय ... आचार्याय तुभ्यं संप्रददे ।

तथा अन्येभ्यो दक्षिणा दद्यात्

(दक्षिणासङ्कल्प गर्ने)

ॐ अद्येह ... गोत्रः ... शर्माहं कृतस्य शिलान्यासकर्मणो न्यूनातिरिक्तदोषपरिहारार्थम् इमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथाभागं विभज्य दातुं जले उत्सृजे ।

(दक्षिणा दिने)

इति दक्षिणं दत्त्वा –
यान्तु देवेति देवान् विसृज्य कायेनवाचा इति कर्मेश्वरार्पणं कृत्वा यस्मस्मृत्येत्यादि प्रार्थयेत् ।

॥ इति शिलान्यासविधिः ॥